Roll No. ..................................

# D–3478

## M. A. (Final) EXAMINATION, 2020

SANSKRIT

Paper Tenth

(भाषाकौशलम्)

*Time : Three Hours* ] [ *Maximum Marks : 100*

**नोट :** सर्वे प्रश्नाः संस्कृतमाध्यमेनैव समाधेयाः।

### इकाई—I

1. कमप्येकं विषयमधिकृत्य संस्कृतमाध्यमेनैव निबन्धो लेख्यः— 25

   (i) वेदोऽखिलो धर्ममूलम्।

   (ii) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

   (iii) उपनिषदां महत्त्वम्।

   (iv) भारतेभातु भारती।

   (v) कालिदासस्य कवित्वम्।

### इकाई—II

2. (क) केषाञ्चित् पञ्चवाक्यानामनुवादो विधेयः— 10

   (i) राम ने बालि को बाण से मारा।

   (ii) विद्वानों का समय काव्यशास्त्र पढ़ने में बीतता है।

   (iii) वह विद्यालय गया।

   (iv) सूर्य उगता है।





   (v) मैं गुरु को प्रणाम करता हूँ।

   (vi) जिसमें विद्या है वही बलवान है।

   (vii) कृष्ण व्याकरण पढ़ता है।

   (viii) सज्जन सुख का अनुभव करता है।

   (ix) इन्द्र को यह आहुति समर्पित है।

   (x) पुत्र पिता का अनुकरण करता है।

   (ख) प्राचार्यं सम्बोध्य स्वयोग्यता प्रदर्शनपूर्वकं शुल्कमुक्त्यै आवेदनं विधेयम्। 5

   अथवा

   स्वविद्यालये आयोज्यमान-वार्षिकोत्सव-दर्शनाय एको निमन्त्रण-पत्रो लेख्यः।

   (ग) सम्प्रति 'पर्यावरण संरक्षणाय को यत्नो विधेयः' इति विषयमधिकृत्य समाचारपत्राय आलेखो लेख्यः। 10

   अथवा

   देशभक्तेः महत्त्वं प्रतिपादनम् अस्याः प्रासङ्गिकतामधिकृत्य दूरदर्शनाय आलेखो लेख्यः।

### इकाई—III

3. (क) केषाञ्चित् पञ्चवाक्यानां वाच्यपरिवर्तनं क्रियताम्— 15

   (i) रामेण पाठः पठ्यते।

   (ii) अहं उपविशामि।

   (iii) बालकेन ग्रन्थः दृश्यते।

   (iv) मया जलं पीयते।

   (v) तैः चलचित्राणि दृश्यन्ते।

   (vi) तया वाटिका गम्यते।

   (vii) सः पुस्तकं पठति।

(viii) बालकेन क्रीड्यते।

(ix) रामः पाठं पठति।

(x) छात्रः उपविश्यते।

(ख) केषाञ्चित् **पञ्च**पदानां लिङ्गनिर्देशं कृत्वा तत्साहाय्येन संस्कृतवाक्यरचना कार्या— 5

(i) राम। (ii) राजन्।

(iii) नदी। (iv) धेनु।

(v) हरि। (vi) वारि।

(vii) गो। (viii) वधू।

(ix) भगवत्। (x) लता।

(ग) केषाञ्चित् **पञ्च**पदानां **त्रीन्** पर्यायवाचिनः लिख्यताम्— 10

(i) स्वर्गः। (ii) देवता।

(iii) सूर्यः। (iv) अग्निः।

(v) असुर। (vi) वायु।

(vii) सर्पः। (viii) समुद्रः।

(ix) विष्णुः। (x) बुद्धिः।

**इकाई—IV**

4. (क) वाक्य**पञ्चकं** संशोधयत— 10

(i) प्राते भ्रमणं लाभदायकम्।

(ii) अहो विधिर्वलवती।

(iii) दक्षिणा प्रतिगृहीत्वा ब्राह्मणाः प्रस्थिताः।

(iv) मया चन्द्रः पश्यते।

(v) कथं सा स्त्री रादति।

(vi) आ समुद्रस्य पृथिव्या अयं राजा।

(vii) अद्य प्रातः वृष्टिर्वभूव।

(viii) कदापि मृषां मा वदेत्।

(ix) ते जीवनाय धिक्।

(x) नास्ति मे मरणस्य भयम्।





(ख) अधोलिखित गद्यांशाधारेण प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 10

कश्चित् श्रृगालः स्वेच्छया नगरस्य समीपे भ्राम्यन् कस्यचिद् रजकस्य गृहं प्राविशत्। तत्र स नीली भाण्डे अपतत्, येन तस्य वर्णो नीलोऽभवत्। ततो वनं गत्वा श्रृगालान् आहूय तेनोक्तम्—अहं भगवत्या वनदेवतया स्वहस्तेन अरण्यस्य राज्ये अभिषिक्तः। अस्मिन् अरण्ये मम आज्ञया व्यवहारः कार्यः। श्रृगालाः तं विशिष्टवर्णम् अवलोक्य प्रणम्य अवदत्—यथा आज्ञापयति देव! एव क्रमेण सर्वेषु पशुषु तस्य स्वामित्वम् अभवत्। ततः व्याघ्रसिंहादीन् उत्तमान् सेवकान् प्राप्य नीलवर्णः स्वज्ञातीन अनादृतवान्। अथ एकदा सन्ध्या समये सर्वे श्रृगालाः सहैव शब्दम् अकुर्वन्। ततस्तं शब्दं श्रुत्वा जातेः स्वभावात् नीलवर्णोऽपि सः शब्दम् अकरोत्। इत्यं तं श्रृगालं परिज्ञाय व्याघ्रस्तं हतवान्। सत्यमेवोक्तम्—

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्॥

**प्रश्न :**

(i) श्रृगालः भ्राम्यन् कस्य गृहं प्रविष्टः ?

(ii) सः कुत्र अपतत् ?

(iii) तेन वन्यजीवैः कि कथितम् ?

(iv) सन्ध्यायां श्रृगालाः किं अकुर्वन् ?

(v) जन्तौ किं नित्यं दुरतिक्रमो भवति ?